पेचकः। राष्ट्रादिभङ्गः। भीतिः। इति शब्दरत्नावली॥ दैत्यः। इति हेमचन्द्रः। २। ८८॥ (यथा, भागवते। ७। २। ४।
"भो भो दानवदैतेया! द्विमूर्द्धन्! त्र्यक्ष! शम्बर!। शतबाहो! हयग्रीव! नमुचे! पाक! इल्वल!॥"
पिबतीति। पा+"इण्भीकापेति।" उणां ३। ४३। इति कन्।) पानकर्त्तरि त्रि॥

पाककृष्णः, पुं, (पाके कृष्णं फले यस्य।) कृष्णफलपाकः। पानी आमला। इति शब्दचन्द्रिका॥

पाककृष्णफलः, पुं, (पाके कृष्णं फलं यस्य।) पाककृष्णः। इति शब्दमाला॥

पाकजं, क्ली, (पाकात् जायते इति। पाक+जन्+ड।) काचलवणम्। परिणामशूलम्। इति राजनिर्घण्टः॥ (पाकजाते त्रि। यथा, भाषापरिच्छेदे। ३६।
"स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः॥")

पाकपुटी, स्त्री, (पाकाय पुटी।) कुम्भशाला। इति हेमचन्द्रः। ४। ६६६॥ पोयान् इति भाषा॥

पाकफलः, पुं, (पाककृष्णं फलमस्य।) फलपाकः। इति शब्दचन्द्रिका॥ पानी आमला इति भाषा॥

पाकभाण्डं, क्ली, (पाकाय पाकस्य वा भाण्डम्।) पाकपात्रम्। यथा,—
"यस्य यस्य तु वर्णस्य यद्यत् स्यात् पश्चिमन्त्वहः।
स तत्र गृहशुद्धिञ्च वस्त्रशुद्धिं करोत्यपि॥
पश्चिमन्त्वहः अशौचान्त्यदिनम्। गृहशुद्धिं प्राक्तनपाकभाण्डत्यागोल्लेपनादिना।" इति शुद्धितत्त्वम्॥

पाकमत्स्यः, पुं, (पाकः पाकयुक्तो मत्स्यो यत्र।) मत्स्यव्यञ्जनम्। तत्पर्य्यायः। मत्स्यलम् २। इति शब्दचन्द्रिका॥ (समुद्रजातमत्स्यविशेषः। यथा, सुश्रुते सूत्रस्थाने। ४६ अध्याये। "तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः॥" कीटविशेषः। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।
"पद्मकीटो दुन्दुभिको मकरः शतपादकः।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी॥")

पाकयज्ञः, पुं, (पाकसाध्यो यज्ञः। शाकपार्थिववत् समासः।) वृषोत्सर्गगृहप्रतिष्ठादीनां होमः। चरुहोमाङ्गककर्म्म। यथा,—
"प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहसः॥"
इति तिथितत्त्वम्॥
(ब्रह्मयज्ञादन्ये पञ्चमहायज्ञान्तर्गता वैश्वदेवहोमबलिकर्म्मनित्यश्राद्धातिथिभोजनात्मकाश्चत्वारः पाकयज्ञाः। यथा, मनुः। २। ८६।
"ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम्॥"
अष्टकादयोऽपि पाकयज्ञाः। यथा, तत्रैव। २। १४३।
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते॥"
"अष्टकादीन् पाकयज्ञान्।" इति तट्टीकायां कुल्लुकभट्टः॥)

पाकयज्ञिकः, पुं, (पाकयज्ञं करोतीति। पाकयज्ञ+ठञ्।) पाकयज्ञकर्त्ता। (पाकयज्ञस्य व्याख्यानस्तत्र भवो वा। "क्रतुयज्ञेभ्यश्च।" ४। ३। ६८। इति ठञ्। पाकयज्ञव्याख्यानग्रन्थः। पाकयज्ञभवश्च। इति व्याकरणम्॥)

पाकरञ्जनं, क्ली, (पाकं पच्यमानं रञ्जयतीति। रञ्ज+णिच्+ल्युः।) तेजपत्रम्। इति शब्दचन्द्रिका॥

पाकलं, क्ली, (पाकं लातीति। ला+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) कुष्ठौषधिः। इत्यमरः। २। ४। १२६॥

पाकलः, पुं, (पाक+ला+कः।) कुञ्जरज्वरः। इति मेदिनी। ले, १०८॥ बोधनद्रव्यम्। अनिलः। अनलः। इति विश्वः॥ व्रणादिकारिणि, त्रि॥

पाकलिः, स्त्री, (पाक+ला+इन्।) वृक्षविशेषः। इति रत्नमाला। रोहिणीति केचित्॥

पाकली, स्त्री, (पाकलि+ङीष्।) कर्कटी। इति शब्दमाला॥

पाकशाला, स्त्री, (पाकस्य शाला गृहम्।) रन्धनगृहम्। तत्पर्य्यायः। रसवती २। इति जटाधरः॥ पाकस्थानम् ३ महानसम् ४। इत्यमरः। २। ६। २७॥ अग्निकोणे तस्याः कर्त्तव्यता। यथा,—
"प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्।
शयनं याम्यदिग्भागे नैरृत्यां शस्त्रमन्दिरम्॥
प्रतीच्यां भोजनगृहं वायुभागे सभागृहम्।
भाण्डारसदनं सौम्ये त्वैशान्यां देवतालयम्॥"
इति मुहूर्त्तचिन्तामणिटीकायां पीयूषधारायां कश्यपवचनम्॥

पाकशासनः, पुं, (शास्तीति। शास+ल्युः। ततः पाकस्य तदाख्यया प्रसिद्धस्य असुरस्य शासनः शास्ता।) इन्द्रः। इत्यमरः। १।१।४४॥ तन्नामकारणं यथा, वामनपुराणे।
"पाकं जघान तीक्ष्णाग्रैर्म्मार्गणैः कङ्कवाससैः।
तत्र नाम विभुर्लेभे शासनत्वाच्छरैर्दृढैः।
पाकशासनतां शक्रः सर्व्वामरपतिर्व्विभुः॥"

पाकशासनिः, पुं, (पाकशासनस्यापत्यम्। "अत इञ्।" ४।१।९५। इति इञ्।) इन्द्रपुत्त्रः। जयन्तः। इत्यमरः। १। १। ४६॥ (अर्ज्जुनः। यथा, महाभारते। १। १३७। ८।
"सोऽब्रवीन्मेघगम्भीरस्वरेण वदताम्वरः।
भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम्॥")

पाकशुक्ला, स्त्री, (पाके परिणामे शुक्ला।) खड़ी। यथा, शब्दचन्द्रिकायाम्।
"पाकशुक्ला शिलाधातुः कठिनी कक्खटी खड़ी॥"

पाकस्थानं, क्ली, (पाकस्य स्थानम्।) महानसम्। इत्यमरः। २। ६। २७॥

पाका, स्त्री, (पाक+अजादित्वात् टाप्।) बालिका। इति जटाधरः॥

पाकारिः, पुं, (पाकं ऋच्छतीति। ऋ गतौ+इन्।) श्वेतकाञ्चनम्। इति रत्नमाला॥

पाकिमं, त्रि, (पाकेन निर्वृत्तम्। पाक+भावप्रत्ययान्तादिमप्।) पक्तिमम्। पाकेन निष्पन्नम्। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते। सूत्रस्थाने। ४६ अध्याये।
"भेदोघ्नः पाकिमः क्षारो मूत्रवस्तिविशोधनः॥")

पाकुकः, पुं, (पचतीति। पच पाके+"पचिनशोर्णुकन्कनुमौ च।" उणां। २। ३०। इति णुकन् कादेशश्च।) सूपकारः। इत्युणादिकोषः॥

पाक्यं, क्ली, (पच्यतेऽनेन। पच्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्। "चजोः कुघिण्ण्यतोः।" ७।३।५२। इति कुत्वम्।) विड्लवणम्। इत्यमरः। २। ६। ४२॥ पांशुलवणम्। इति रत्नमाला॥ (यथा, सुश्रुते। १।४२।
"सैन्धवसौवर्च्चलविड्पाक्यरोमकसामुद्रकपक्तिमयवक्षारोषप्रसूतसुवर्च्चिकाप्रभृतीनि समासेन लवणो वर्गः॥" पचनीये, त्रि। यथा, चक्रपाणिसंग्रहे ज्वराधिकारे पित्तज्वरचिकित्सायाम्।
"अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥")

पाक्यः, पुं, (पच्+ण्यत् कुत्वञ्च।) यवक्षारः। इत्यमरः। २। ६। १०६॥

पाक्षायणः, त्रि, (पक्षस्यायं पक्षे भवः पक्षेण निर्वृत्त इति वा। पक्ष+"वुञ्छण्कठजिल।" ४। २। ८०। इति फक्।) पक्षसम्बन्धी। पक्षे भवः। इति सिद्धान्तकौमुदी॥

पाक्षिकः, त्रि, (पक्षे तिष्ठतीति। पक्ष+ठक्।) पक्षपाती। यथा,—
"स को राजा न शास्ता यः प्रजावध्यश्च [पाक्षिकः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्यायः॥ (पक्षिणो हन्तीति। "पक्षिमत्स्यमृगान् हन्ति।" ४। ४। ३५। इति ठक्।) पक्षिघातकः॥ (पक्षे पक्षान्तरे भवतीति। पक्षकालभवः॥ पक्षेण निर्वृत्त इति। पक्ष+ठञ्। पक्षसाध्यः। इति व्युत्पत्तिलब्धोऽर्थः॥)

पाखण्डः, पुं, (पातीति। पा+क्विप्। पास्त्रयीधर्म्मस्तं खण्डयतीति। खडि भेदने+पचाद्यच्। यदुक्तम्।
"पालनाच्च त्रयीधर्म्मः पाशब्देन निगद्यते।
तं खण्डयन्ति ते यस्मात् पाखण्डास्तेन हेतुना।
नानाव्रतधरा नानावेशाः पाखण्डिनो मताः॥")
पाषण्डः। इत्यमरटीकायां भानुदीक्षितः॥

पागलः, पुं, (पा रक्षणं तस्मात् गलति आत्मरक्षणात् विच्युतो भवतीति। गल्+अच्।) उन्मत्तः। वातुलः। यथा,—
"पागलायाङ्गहीनाय चान्धाय वधिराय च।
जड़ाय चैव मूर्खाय क्लीवतुल्याय पापिने।
ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः॥